मज्जेन वा याति भवेद्रुजा च ।
उच्छ्वासरोधाद्भवते तथापि
वातादिकैर्वा कुपितैरथापि ॥
संसर्गदोषैरपि सर्व्वदोषैः
क्रिमिव्रणेनापि तथैव चान्या।
सञ्जायते कर्णरुजा नरस्य
शृणोति तेनापि च शङ्खनांश्च ॥
निःस्वानमेघध्वनिदन्तशब्दान्
शूलं सदाहञ्च शिरोव्यथा च ।
भेरीस्वनं वत्स ! शृणोति सर्व्वं
पित्तेन तं विद्धि भिषग्वरिष्ठ ! ॥
तथा च मूर्च्छां प्रतनोति शब्दं
मेघस्वनं वा कफजे शृणोति ॥
क्रिमिदोषे स्रवेत् पूयं सरक्तं याति सत्तम ! ।
तथा चैवाभिघातेन जायते तीव्रवेदना ॥
क्षतेन पूयं स्रवते चाल्याद्भवति चापरः ।
तथापिलुतिदोषेण जायते कर्णजा रुजा ॥
न कर्णरोगे जलपूरणञ्च
न पूर्णमेतत् कथितं विधिज्ञैः ।
तेषां हितं स्वेदनमेव कर्णे
स वाष्पबिन्दुश्च हितो मतश्च ॥
समुद्रफेनं सिन्धूत्थं सूक्ष्मचूर्णञ्च कारयेत् ।
सौवीरकरसेनापि वातिके कर्णपूरणम् ॥
आर्द्रसौवीरकरसं शुण्ठीसैन्धवगुग्गुलुम् ।
माषकुल्माषतोयेन तैलं पक्वातिचोष्णकम् ।
तुम्बीरसश्च धार्य्येत कर्णरोगे प्रशस्यते ॥
यष्टीमधुः कुष्ठमरिष्टपत्रं
शिवाविशाखा सुमनः प्रवालाः ।
विपाचितं कर्णभवे च शूले
च पैत्तिके वा घृतमेव शस्तम् ॥
मार्जारसं सैन्धवकं विडङ्गं
चम्पकरागस्य घृतेन युक्तम् ।
तथैव सौवीररसश्च पथ्या
सुतश्च वस्त्रं परिपूर्णमेतत् ॥
शिवम्भवेत्तत् श्रुतिपूरणाय
पूयं सरक्तं क्रिमिजं निहन्ति ॥
सर्व्वे प्रोक्ताः शिरोरोगास्तैलानि च घृतानि च ।
नानाविकान् न युञ्जीत शिरोरोगविदाम्बरः ।
वातहारीणि पथ्यानि विदाहीनि गुरूणि,च”॥१॥)
कर्णलतिका, स्त्री,(कर्णस्य लतिका लतेव ।) पालिः ।
इति हेमचन्द्रः ॥ कानेर पाता इति भाषा ॥
कर्णवंशः, पुं, (कर्णः कर्णाकृतिः कर्णवत् सञ्जो वा
वंशो यत्र ।) मञ्चः । इति हारावली ॥
कर्णवर्ज्जितः, पुं, (कर्णेन श्रवणेन्द्रियेण वर्जितः हीनः ।
चक्षु दर्शनेन्द्रियेणैव श्रोत्रकार्य्यकारित्वात् तथा-
त्वम् ।) सर्पः । इति शब्दचन्द्रिका ॥ कर्णहीने त्रि ॥
कर्णवेधः, पुं, (कर्णयोः कर्णस्य वा वेधः वेधनम् ।)
कर्णयोश्छिद्रकरणम् । कानवधान इति भाषा ।
तस्य विधिर्यथा । मदनरत्ने वशिष्ठश्रीधरौ ॥
“मासे षष्ठे सप्तमे वाष्टमे वा
वेध्यौ कर्णौ द्वादशे षोडशेऽह्नि ।
मध्येनाह्नः पूर्व्वभागे न रात्रौ
मद्यन्ते द्वे द्वे तिथी वर्ज्जयित्वा” ॥
अत्र जन्ममासो वर्ज्ज्यः । ज्योतिर्निबन्धे गर्गः ।
“मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे ।
कर्णवेधं प्रशंसन्ति पुष्ट्यायुःश्रीविवृद्धये” ॥
मदनरत्ने ।
“प्रथमे सप्तमे मासि अष्टमे दशमेऽथवा ।
द्वादशे च तथा कुर्य्यात् कर्णवेधं शुभावहम्” ॥
हेमाद्रौ व्यासः ।
“कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने” ॥
श्रीधरः ।
“हरिहरकरचित्रासौम्यपौष्णोत्तरार्य्या-
दितिवसुषु घटाली सिंहवर्ज्ज्येषु लग्ने ।
शशिगुरुबुधकाव्यानां दिने पर्व्वरिक्ता-
रहिततिथिषु शुद्धे नैधने कर्णवेधः” ॥
मदनरत्ने वृहस्पतिः ।
“द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ।
द्वादशी पञ्चमी शस्ता तृतीया कर्णवेधने ॥
सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः ।
शूद्रस्य चायसी सूची मध्यमाष्टाङ्गुलात्मिका” ॥
हेमाद्रौ देवलः ।
“कर्णरन्ध्रं रवेश्छाया न विशेदग्रजन्मनः ।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः” ॥ शङ्खः ।
“अङ्गुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि ।
तस्मै श्राद्धं न दातव्यं दत्तञ्चेदासुरं भवेत्” ॥
इति निर्णयसिन्धुः । कर्णषट्कदोषनिवारणार्थं
कर्णस्य वेधनम् । सोदरभ्रातॄणां संस्काराणाञ्च
पौर्व्वापर्य्यक्रमः कर्णवेधस्यासंस्काररूपत्वात् न
तथा नियमः । यथा,—
“यदापत्यद्वयं तिष्ठेत् सम्भवोऽप्यपरस्य च ।
कर्णषट्कं विजानीयाद्गर्हितं तनयस्य च ॥
इत्याशङ्क्य तयोर्मध्ये शुद्धिर्यस्याथ वत्सरे ।
कर्णवेधो हितस्तस्य तस्य ज्येष्ठविचारणा ॥
षट्कर्णोत्पत्तिमाशङ्क्य भानोः शुद्धासमेऽपि च ।
कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत्” ॥
इति मलमासतत्त्वे मार्कण्डेयवचनम् ॥ अस्य काल-
नियमो यथा,—राजमार्त्तण्डे ।
“न जन्ममासे न च चैत्रपौषे
न वर्षयुग्मे न हरौ प्रसुप्ते ।
रवौ च दुष्टे न च कृष्णपक्षे
न जन्मभे कर्णविधिः प्रशस्तः” ॥
तथा दीपिकायाम् ।
“नो जन्मेन्दुभमाससूर्य्यरविजक्ष्माजाहसमाप्यते
शस्तेऽर्के लघुविष्णुयुग्ममृदुभस्वात्युत्तरादित्यभैः ।
सौम्यैस्त्र्यायत्रिकोणकण्टकगतैः पापैस्त्रिलाभारिगै
रोजोऽब्दे श्रुतिवेध इज्यसितभे लग्ने तु काले शुभे ॥
अत्रापि तिथ्यृक्षादिविद्धमृक्षं वर्जयेत् ॥
यथाह गर्गः ।
“कर्णवेधव्रते कुर्य्यादुदङ्मार्गस्थिते रवौ ।
दक्षिणाशास्थिते भानौ नैव कुर्य्यात् कथञ्चन” ॥
इति ज्योतिषतत्त्वम् ॥
कर्णवेधनी, स्त्री, (विध्यतेऽनया । विध + करणे ल्युट् ।
ततो ङीप् ।) कर्णवेधनास्त्रम् । इति त्रिकाण्डशेषः ॥
कर्णवेष्टकं, क्ली, (कर्णौ वेष्टयति । वेष्ट् + ण्वुल् ।)
कुण्डलम् । इति हेमचन्द्रः ॥
कर्णवेष्टनं, क्ली, (कर्णौ वेष्ट्येतेऽनेन । वेष्ट् + करणे
ल्युट् ।) कुण्डलम् । इत्यमरः । २ । ६ । १०३ ॥
कर्णशष्कुली, स्त्री, (कर्णयोः कर्णस्य वा शष्कुलीव ।)
कर्णगोलकम् । तत्पर्य्यायः । वेष्टनम् २ । इति हेम-
चन्द्रः ॥
कर्णशूलः, पुं, (कर्णस्य शूलः शूलवत् यन्त्रणादायकः ।)
कर्णरोगविशेषः । तस्यौषधं यथा,—
“हिङ्गुतुम्बुरुशुण्ठ्या च साध्यं तैलन्तु सार्षपम् ।
एतद्धि पूरणं श्रेष्ठं कर्णशूलापहं परम् ॥ १ ॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावश्च कर्णयोः ।
क्रमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥२॥
शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्चलं यवक्षारं सामुद्रं सैन्धवं तथा ।
भुजग्रन्थि विडं मुस्तं मधु शुक्तचतुर्गुणम् ॥
मातुलुङ्गरसश्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥
बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः ।
पूरणादस्य तैलस्य क्रमशः कर्णयोः खिलाः ॥
क्षिप्रं विनाशमायान्ति शशाङ्कक्षतशेखर ! ।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥ ३ ॥
प्रस्थे द्वे गन्धमालानां क्वाथयेत् द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्णवा गोक्षुरकं सैन्धवं त्र्यूषणं वचा ॥
सरलं सुरदारुश्च वृहती कण्टकारिका ।
नस्यपानाद्भरत्येव कर्णशूलं हनुग्रहम् ॥
बाधिर्य्यं सर्व्वरोगांश्च अभ्यङ्गाच्च महेश्वर !” ॥ ४ ॥
इति गारुड़े १९८ अध्यायः ॥ (कर्णरोगशब्देऽस्य
विवरणं ज्ञेयम् ॥)
कर्णसंस्रावः, पुं, ( कर्णस्य कर्णयोर्वा संस्रावः पूय-
शोणितादेः निःस्रावणम् यत्र रोगे । ) कर्ण-
रोगविशेषः । तस्य निदानसम्प्राप्तिरूपाणि ।
“शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्द्दितः
सकर्णसंस्राव इति प्रकीर्त्तितः” ॥
इति माधवकरः ॥
कर्णस्फोटा, स्त्री, (कर्णस्य स्फोटेव स्फोटा विदारणं
यस्याः ।) लताविशेषः । कानफाटा इति भाषा ।
तत्पर्य्यायः । श्रुतिस्फोटा २ त्रिपुटा ३ कृष्णत
ण्डुला ४ चित्रपर्णी ५ कोपलता ६ चन्द्रिका ७
अर्द्धचन्द्रिका ८ । अस्या गुणाः । कटुत्वम् ।
तिक्तत्वम् । हिमत्वम् । सर्व्वविषग्रहभूतादिदोष-
सर्व्वव्याधिनाशित्वञ्च । इति राजनिर्घण्टः ॥
कर्णाटः, पुं, ( कर्णेषु अटति प्रभूतयशस्विन एतद्-
देशस्वराज्ञो गुणादिकीर्त्तनेन सर्व्वेषां कर्णेषु